This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय रामटेक

E

हस्तलिखित संग्रह

दाखल.क्र M-2653 विषय महाभारत

नाव राजधर्म मोक्ष

लेखक/लिपीकार -

पृष्ठ 25 काळ - पुर्ण/अपुर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीकृष्णायनमः॥शौनानिकउवाच॥म
याहिदेवदेवस्यविष्णोरमिततेजसः॥श्रु
तासंभूतयःसर्वागदतस्त्वंसुव्रत॥१॥यदि
प्रसन्नोभगवान्अनुग्राह्योस्मिवायदि॥त
दहंश्रोतुमिच्छामिन्नणांदुःस्वप्ननाशनं॥२॥
स्वप्नाहिसुमहाभागदृश्यंतेयेशुभाःशुभाः
फलानितस्यलक्षंतिनृणान्येवभार्गव॥३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तादृक्पुण्यंपवित्रंचनृणामतिशुभप्रदं
दुःस्वप्नोपशमंयांतितन्मेविस्तरतोवद
॥४॥शौनकउवाच॥इदमेवमहाभागपृ
ष्टवांस्तेपितामहः॥भीष्मंधर्मेभृतांश्रेष्ठं
धर्मपुत्रोयुधिष्ठिरः॥५॥युधिष्ठिरउवा
च॥जितंतेपुंडरीकाक्षनमस्तेविश्वभाव
नः॥नमस्तेस्हृषीकेशमहापुरुषपूर्वज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यायंपुरुषमीशानंपुरुहुतपुरातनं ऋ
तमेकाक्षरंब्रह्मव्यक्ताव्यक्तसनातनं ७ अ
सच्चसच्चमसत्यंनित्यंचसदसत्परं परंपुरा
णंस्रष्टारंपुराणंपरमव्ययं ८ मांगल्यंमंग
लंविष्णुंवरेण्यंवरदंशुभं नमस्कृत्यहृषीके
शंचराचरगुरुंहरिं ९ प्रवक्ष्यामिमहापु
ण्यंकृष्णद्वैपायनस्यच येनोक्तेनऋतेना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिनश्यतेसर्वपातकं ॥१०॥ नारायणसमोदे
वोनभूतोनभविष्यति ॥ एतेनसत्यवाक्येन
सर्वार्थान्साधयाम्यहं ॥११॥ किंतस्यबहुभिर्मं
त्रैःकिंतस्यबहुभिर्हुतैः ॥ नमोनारायणाये
तिमंत्रःसर्वार्थसाधकः ॥१२॥ यज्ञेबहुज्ञंप
रमसुदारंयत्क्षीपमध्येश्रुतमात्मयोगात् ॥ प
रब्रह्मरंधवतीमहर्षेतस्मैनमोज्ञानतमोनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राय॥१३॥ नमोभगवतेतस्मैव्यासायामि
ततेजसे॥यस्यप्रसादात्वक्ष्यामिनारायण
कथामिमां॥१४॥वैशंपायनमासीनंपुरा
णार्थविचक्षणं॥इममर्थंसराजर्षिःपृष्ट्वा
नृजन्मेजयः॥१५॥जन्मेजयउवाच॥किं
जपन्मुच्यतेजंतुकिंजपन्सुखमश्नुते॥दुःख
प्रनाशनंपुण्यंश्रोतुमिछामिनारद॥१६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैशंपायनउवाच॥ देवव्रतंमहाप्राज्ञसर्वज्ञा
स्त्रविशारद॥विनयेनोपसंगम्यपर्यप्रछयुधि
ष्ठिर॥१६॥युधिष्ठिरउवाच॥ दुःस्वप्नदर्शनि
घोरमवेक्ष्यभरतर्षभ॥प्रयतःकिंजपेज्जा
प्यंविबुधःकिंमनुस्मरेत्॥१७॥पितामहप्र
सादेनबुद्धिभेदोभवेन्मम॥तदहंश्रोतुमि
च्छामिब्रूहिनोवदतांवर॥१८॥भीष्मउवा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शृणुराजन्महाबाहो वर्णयेयंहरांतिकं ॥
दुःस्वप्नदर्शनेघोरेयद्वानिसंसमाहित ॥१९॥
अत्राप्युदाहरंतिमंमितिहासंपुरातनं ॥ गजें
द्रमोक्षणंपुण्यंकृष्णस्यात्किल्मिकर्मण : ॥
२०॥ सर्वरत्नमय : श्रीमान्त्रिकुटोनामपर्व
त : ॥ सनुपर्वतराजस्यसुमेरोर्भास्करद्युति : ॥
२१॥ क्षीरोदजलवीचुंगैर्धौतामलशिलातल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुत्थितः सागरांमिन्नदेवर्षिगणसेवितं ॥२२॥
अप्सरोभिः परिवृतः श्रीमान्त्रश्रवणाकुलं ॥
गंधर्वैर्किंन्नरैरपेक्षैः सिद्धचारणपन्नगैः ॥२३
मृगैः सिंहैर्गजैर्दैश्च वृत्तमात्रोविरानने पु
न्नागैः कर्णिकारैश्च सबिल्वैर्दिव्यपाटलैः ॥२४
कृतनिंबकदंबैश्च चंदनागरुचंपकैः ॥ शालै ४
स्तालैस्तमालैश्च सरूभिश्चार्जुनैः सथा ॥२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बकुलैः कुंदपुष्पैश्चसरलैर्देवदारुभिः॥मं
दारकुसुमैश्चान्यैपारिजातैश्चसर्वतः॥२६॥
एवंबहुविधैर्वृक्षैः सोभितः समलंकृतः॥ना
नाधातुंकितैश्शृंगैः प्रस्रवद्भिः समंततः॥२७
र्दकैः शाखामृगैः सिंहैः मातंगैश्चसदामदैः
जीवंजीवाकरांपृष्ठंचकोरसिखनादितं॥२८
पद्मरागसमप्रख्यंज्वालापुंजमिवोत्थितं॥त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यैकं कांचनशृंगंसेवतेयंदिवाकर॥२९॥नाना
पुष्पैसमाकिर्णनानागंधैसमाकुलं॥द्वितीयं
राजतंशृंगंसेवतेयंनिशाकरः॥३०॥पुंडरां
बुदसंकाशंतुषाराचलसन्निभं॥वज्रेंद्रनील
वैडुर्यतेजोभिर्भासयंनभः॥३१॥तृतीयंब्र
ह्मसदनंप्रकृष्टंशृंगमुत्तमं॥पद्मरागसमप्र
ख्यतारांगणसमन्वितं॥३२॥मातलूतआपप्रं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिनन्ततेसाननाश्रिका ॥ नातप्ततपसो लो
केयेचमाप्रकृतोनरा ॥ २३ ॥ नानाराधितगो
विंदशैलंपश्यंतितेनरा ॥ तस्यसानुमतःपृष्ठे
सरःकांचनपंकजं ॥ २४ ॥ कारंडवसमाकी
र्णराजहंसोपशोभितं ॥ कमलैःशातपत्रै
श्चकांचनंसमलंकृतं ॥ २५ ॥ पत्रैमरकतप्र
ख्यैपुष्पैकांचनसंनिभैः ॥ गुल्मैःकीचकवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णूनांसमंतात्परिवारितं ॥३७॥ अत्यद्भुतंमहा
स्थानंविचित्रंसिखराकुलंच ॥शतयोजनवि
स्तीर्णंदशयोजनमायतं ॥३८॥ खातेनद्विगुणं
प्रोक्तंसरयौरिवनिर्मलं ॥उपहारायदेवा नां
सिद्धार्चितपंकजं ॥३९॥ तस्मिन्सरसिदुष्टा
त्माविरूपोतंजलाश्रयः ॥आगृह्णातिहोगजें
द्राणांदुराधर्षोमहाबलः ॥४०॥ अथदंतोज्ज्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लमुखः कदाचिद्गजयूथपः॥ आजगामग
जाक्रांतः करेणुपरिवारितः॥ ४१॥ मदस्रावी
जलाकांक्षी पादचारीवपर्वतः॥ वासयन्मदगं
धेनमहानैरावतोयमः॥ ४२॥ गजोहंजननसं
काशोमदाच्चलितलोचनः॥ तर्षितः पातुका
मोसोमचतीर्णश्चतत्परः॥ ४३॥ ग्रहीतस्तस्य
तत्तोयंग्राहः सउपपद्यते॥ सुनीलपंकजव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेयूथमध्येगतःसुखी ॥४४॥ गृहीतस्तेनरौद्रे
णग्राहेनाव्यक्तमूर्तिना ॥ पश्यंतीनांकरिणी
नांक्रोशंतीनांचदारुणं ॥४५॥ नीयतेपंक
जवनेग्राहेनानिवलीयसा ॥ गजश्चाकर्षतेने
तीरंग्राहश्चाकर्षतेजलं ॥४६॥ तयोरासीत्महा
युद्धंदिव्यवर्षसहस्रकं ॥ दारुणेसयतःपाशै
र्निप्रयत्नगतिकृत ॥४७॥ वेक्षमानःसघोरैस्क ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाशैर्नागोदृढंव्रतंतथा॥विस्फुर्यश्चयथाशूर
त्तमाविक्रोशास्तुमहारवान्॥४८॥व्यथितःस
निरुत्साहोगृहीतोघोरकर्मणा॥परमंपद
माप्नोतिमनसाचिंतयेद्धरिं॥४९॥सतुगजः
वरःश्रीमान्नारायणपरायणं॥नमेवशार
णंदेवंगतःसर्वात्मनातदा॥५०॥राकाग्रो
निगृहीतात्माविमुंचेलांतरात्मना॥जन्मज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मांतराभ्यासात्भक्तिमान्गरुडध्वजे ॥५१॥
नान्यंदेवंमहादेवन्पूजयामासकेशवात्
दिग्बाहूंस्वर्गमूर्द्धानंभूपादंगगनोदरं ॥५२॥
आदित्यंचंद्रनयनमनंतंविश्वतोमुखं ॥अम
तात्मानमेघाभंशंखचक्रगदाधरं ॥५३॥स
हस्रशुभनामानिआदिदेवमजंविभुं ॥प्रगृह्य
पुष्कराग्रेणकांचनंकमलोत्तमं ॥५४॥नैवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यंमनसाध्यात्वापूजांकृत्वाजनार्दनं॥आ
पद्मिमोक्षमन्विच्छन्गजस्त्रीप्रमुदीरयत्
५५॥ गजेंद्रउवाच॥ नमोमूलप्रकृतये अ
जिताय महात्मने॥ अनाश्रयायदेवायजि
ष्णवेसहायनमोनमः॥५६॥ नमःआद्यायवी
जायअर्चेयायप्रवर्तिने॥ अनंतायादित्यै
कायअव्यक्तायनमोनमः॥५७॥ नमोगुह्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यगूढायगुणायगुणवर्तिने ॥ अतर्क्यायाप्रमे
यायअतुलायनमोनमः ॥५८॥ नमःशिवाय
शांताय सर्वायचनमोनमः ॥ सनातनायपूर्ण
यपुण्योदयनमोनमः ॥५९॥ नमोजगत्प्रति
ष्ठायगोविंदायनमोनमः ॥ नमोरूपघ्ना
शायसांख्ययोगोद्भवायच ॥६०॥ विश्वेश्वरा
यदेवायशिवायहरयेनमः ॥ नमोरूतस्मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवायनिर्गुणायगुणात्मने ॥ ६१ ॥ नमोदेवा
धिदेवायस्वभावायनमोनमः ॥ नारायणा
यविश्वायदेवानांपरमात्मने ॥ ६२ ॥ नमोन
मः कारणवामनायनारायणायामितविक्र
माय ॥ श्रीशार्ङ्गचक्रासिगदाधरायनमोस्तु
तस्मैपुरुषोत्तमाय ॥ ६३ ॥ गुह्यायवेदतिल
कायमहोदरायसिंधायदैत्यनिधनायच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुर्भुजाय॥ ब्रह्मेंद्ररुद्रमुनिचारणसंस्तुताय
देवोत्तमायविरजायनमोच्युताय॥६४॥नागें
द्रदेहशयनाज्ञानसुप्रियायगोक्षीरहेमशुकनि
लेघनोपमाय॥पीतांबरायमधुकैटभनाशा
नायविश्वायचारुमुकुटायनमोक्षराय॥६५
नाभिप्रजातकमलस्थचतुर्मुखायक्षीरोद
काणिविनिकेतनशोभनाय॥नानाविचीत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुकुटांगदभूषणाययोगीश्वरायविरजाय
नमोवराय ॥ ६६ ॥ भक्तिप्रियायवरदीक्षितसु
दर्शनायफुल्लारविंदविपुलायत्रिलोचना
य देवेंद्रविघ्नसमनोद्यतपौरुषाय नारा
यणायविरजायनमोस्तुताय ॥ ६७ ॥ नारा
यणायनरलोकपरायणायकालायका
लकमलायतलोचनाय ॥ रामायरावणवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाशकतोद्यमायधीरायधीरतिलकायमहो
दराय ॥६८॥ पद्मासनायमणिकुंडलभूष
णायकंसांतकायशिशुपालविनाशनाय
गोवर्धनायसुरशत्रुविनाशनायरामोदरा
यविरजायनमोवराय ॥६९॥ ब्रह्मायनायत्रि
दशायनायलोकायनायात्मभवोद्भवाय ॥
नारायणायात्महितायनायमहावराहाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्करोमि ॥७०॥ कुटस्थमव्यक्तमचिंत्य
रूपंनारायणंकारणमादिदेवं ॥ युगांतशेषं
पुरुषंपुराणंतंवासुदेवंशरणंप्रपद्ये ॥७१
अदृश्यमलेद्यमनंतमव्ययंमहर्षयोब्र
ह्ममयंसनातनं ॥ वदंतियंवैपुरुषंपुराणं
तंवासुदेवंशरणंप्रपद्ये ॥७२॥ उत्तिष्ठतेत
सजलेरुहाक्षंमहावराहस्यमहींविदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यो वितन्वतो वेदमयं शरीरं लोकांतरस्थामु
नयो वदंति ॥ २ ॥ योगे स्वरं चारु विचित्रमौ
लिं ज्ञेयं समक्षं प्रकृतेः परस्थं क्षेत्रज्ञमात्म
प्रवरं वरेण्यं तं वासुदेवं शरणं प्रपद्ये ॥ ३ ॥
कार्यक्रियाकारणमप्रमेयं हिरण्यबाहुं व
रपद्मनाभं महाबलं वेदनिधिं सुरोत्तमं
व्रजामि विघ्नाः शरणं जनार्दनं ॥ ४ ॥ कि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रीटकेयूरमहार्हनिष्कैरलंकृतस
र्वगात्रं॥ पीतांबरंकांचनभक्तिचित्रंमाला
धरंकेशवमभ्युपैमी॥७॥भवेऽवंवेद
विदांवरिष्ठंयोगात्मकंसांख्यविदांवरि
ष्ठं॥आदित्यचंद्राग्निवसुप्रभावंप्रभुंप्रप
द्येसुतमात्मवंतं॥८॥यदक्षरंब्रह्मवदं
न्तिसर्वगंनिश्चाम्ययन्मुखात्प्रसूचते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमीश्वरंमनोयमेर्गुणैःसनातनंलोकगुरुं
स्मरामि॥७८॥श्रीवत्सांकंमहादेवंवेदगुह्यम
नोपमंप्रपद्येसूक्ष्ममचलंवरेण्यमभयप्रदं
७९॥नमस्तस्मैवराहायलीलयोद्धरतेमहीं
खुरमध्येगतोयस्यमेरुखरखरायते॥८०॥
प्रभवःसर्वभूतानांनिर्गुणंपरमेश्वरंप्रप
द्येमुक्तसंगानांयतीनांपरमांगतिं॥८१॥भ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गवंतंगुणाध्यक्षमपरंपरमंपदंशरण्यंश
रणार्त्तायप्रपद्येभक्तवत्सलं ॥८२॥ त्रि चि
क्रमंत्रिलोकेशंलोकानांप्रपितामहं योगा
त्मानंमहात्मानंप्रपद्येहंजनार्दनं ॥८३॥ आ
दिदेवंमजंशुभ्रंवक्त्रंवक्त्रसनातनं ॥ना
रायणमणीयांसंप्रपद्येब्राह्मणप्रियं ॥८४
अकूपारायदेवायनमःसर्वमहात्मने ॥प्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्मेदेवदेवेशंमणीयांसमणोर्यथा॥८५॥ए
कायलोकत्रयायपरतःपरमात्मने॥नमःस
हस्रसिरसेअनंतायमहात्मने॥८६॥नमेव
परमंदेवंमुषयोवेदपारगाः॥कीर्तियंति व
यंसर्वेब्रह्मादीनांपरायणं॥८७॥नमस्तेपुंड
रीकाक्षंभक्तानांभयंकरं॥सुब्रह्मण्यनम
स्तेस्तुत्राहिमांशरणागतं॥८८॥तावद्भवतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेऽतः खंचिंता संसारसागरे ॥ यावत्कमलप
त्राक्षंनस्मरा मिजनार्दनं ॥८९॥ भीष्मउवा
च ॥ भक्तिस्मानुसंचिंत्यनागस्यामेघसं
स्तवात् ॥ प्रीतिमान्भगवान्राजन्शुला
चेक्रगदाधरः ॥९०॥ अरुह्यगरुडेविष्णुरा
जगामसुरोत्तमः ॥ सान्निध्यंकलयामासत
स्मिन्सरसिलोकधृक् ॥९१॥ ग्राहग्रस्तंगजें

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ङ्चतंवैग्राहंजलाद्गृह्यात्॥३॥उज्जहारप्रमेया
त्मातरसामधुसूदनः॥९२॥जलस्थंदारयामा
सग्राहंचक्रेणमाधवः॥मोचयामासनागेंं
द्रंपाशेभ्यःशरणागतं॥९३॥महिदेवलशा
पेनहूहूर्गंधर्वसत्तमः॥इदमस्यपरंगुह्यं
राजन्पुण्यतमंशृणु॥९४॥युधिष्ठिरउ
वाच॥कथंशापोऽयंनागंगंधर्वाणांमहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मनां ॥ एतद्विद्धाम्यहं श्रोतुं विस्तरेण पिता
मह ॥ ९५ ॥ भीष्मउवाच ॥ हाहाहूहूइति ख्या
तौगीतवाद्यविशारदौ ॥ इतितौशप्तापितौतेन
नैवलेनमहात्मना ॥ ९६ ॥ उर्वशीमेनका
रंभातथाचान्येप्सरोगणाः ॥ शक्रस्यपुरतो
राजन्मत्संतोनासुमध्यमाः ॥ ९७ ॥ ततस्तौ
गायमानौतुगंधर्वौराजसन्निधौ ॥ अन्योन्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्रतस्यर्क्षनाक्रस्यघुरतस्तरा॥९८॥आद्य
योरुभयोर्मध्येकःश्रेष्ठोगीतवाद्ययोः॥त
द्वत्सखुरश्रेष्ठंज्ञात्वागीतस्यलक्षणं॥९९
गंधर्वयोर्वचःश्रुत्वाप्रत्युवाचशतक्रतुः॥
युवयोर्गीतवाद्येषुविशेषोनवलक्ष्यते॥१००
एकएवमुनिश्रेष्ठोदेवलोनामनामतः॥
युवयःसंशयःछेत्तोभविष्यतिनसंशयः॥१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ततस्तुतौ चक्रवचो निशम्य प्रणम्य राजन्
शिरसा सुरेश्वरं ॥ गतौ सुहृष्टौ जयकांक्षिणौ
तौ यत्र आश्रमे तिष्ठति हे सजाग्य: ॥ २ ॥ ततो दृ
ष्ट्वा मुनिश्रेष्ठं देवलं संस्थितव्रतं ॥ अभिवा
द्य महात्मानं प्रोचतु: पार्श्वसंस्थितौ ॥ ३ ॥ शके
ण प्रेषितौ देवत्वत्समीपेऽहि जोत्तम ॥ एक
स्य च जयं देही यत्तेमनसि वर्तते ॥ ४ ॥ पृथ्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कूचरतोगायंतोसुचिरमधुरेश्वरं॥नकिंचि
द्वदतेवाकमुनिर्मौनस्यधारणात्॥५॥श्रुण्व
न्नपिपदंतेषांनकिंचिद्वदतेमुनिः॥तदातोकु
पितौतस्यदेवलस्यमहात्मनः॥६॥उचतुस्तौ
तदावाकंगंधर्वौकालनोदितौ॥मूढोयंना ७
भिजानातिनिश्चयंहूहूगीतयोः॥७॥निश्च
यतद्वचस्तेषांगंधर्वाणांमहात्मनां॥क्रोध

उत्थाय विप्रेंद्र इदं वचनमब्रवीत् ॥८॥ ऐष
हूहूरात्मेति ग्राहत्वंयातुमूढधीः ॥ त्वमेव
गजराजस्तु भवस्वगिरिगव्हरे ॥९॥ ततस्तो
षापितौतेनदेवलेनमहात्मना ॥ प्रणम्य
शिरसाविप्रंगंधर्वेविरमुचतुः ॥१०॥ भूमं
डलगतौह्येवांप्रसादंकुरुसत्तम ॥ निश्चयं
वदविप्रेंद्रयेनशापाद्विमुच्यते ॥११॥ त त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तोपुरतोदृष्ट्वा उभौत्रासपभयादितो प्रसुवा
चमुनिश्चेष्टोगंधर्वाणांभयान्वितं ॥१२॥ मेरु
पृष्ठेसरोरम्यंबहुवृक्षसमाकुलं नानापक्षि
निनादाढ्यंद्वितीयइवसागरः ॥१३॥ तस्मि
न्सरोवरेरम्येनित्यंग्राहोविलिप्यते ॥ तत्पार्त
स्तत्रमातंगोगत्वाभिषसिनसंज्ञयः ॥१४॥ तदे
वदेवदेवेशोतोष्यतेनात्रसंशयः ॥ ततोना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रायणः प्रीतश्चापान्नोमोचवीष्यते ॥१५
इत्युक्तऋषिणानेनवरेणमुरुपद्यतः ॥ए
वंपरावतीभूत्वाशुवासिभगवानिह ॥१६
कुरुष्वेतिवरंतुल्यंतुपरांतानांप्रयछति ॥आ
पद्धिमुक्तोयुगपद्भजोगंधर्वएवच ॥१७॥ग
जोपियस्तांयातः श्रीकृष्णेनविमोक्षितः ॥
तस्मात्त्वंपापाद्धिनिमुक्तोप्रागिवाविक्रतोभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृ ॥१८॥ सचखखडुपुष्पायप्रणिपत्यजना
र्दनं ॥ गजोगंधर्वराजश्चपदंनिवृत्यमागत
॥१९॥ प्रीतिमान्पुंडरीकाक्षः शरणागतवत्स
लः ॥ अभयंतत्रदेवेशस्ताभ्यांचैवप्रपूजितः
॥२०॥ इदंचैवमहाबाहोदेवस्यचप्रभाषितं
भजतंगतराजानंवदंतंमधुसूदनं ॥२१ १९
॥ श्रीभगवानुवाच ॥ येमांत्वांचसरश्रेवेग्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हस्यचविदारणं॥आम्रकीचकवेणूनांरू
पंचैवमाश्रयं॥२२॥अश्वत्थंभास्करंगं
गांनैमिषारण्यपुष्करं॥प्रयागंब्रह्मतीर्थं
चदंडकारण्यमेवच॥२३॥पुराणंरामचरि
तंभारताख्यानमुत्तमं॥विभूतिंविश्वरूपं
चसत्यराजमनुस्मृतिं॥२४॥प्रणवंचकुरु
क्षेत्रंगरुडंमेरुपर्वतं॥रूपंकांचनमुल्कानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपंमेरोःसुतस्यच ॥ २५ ॥ येस्मरिष्यंतिमनु
जाःप्रयतास्तिरबुद्धयः ॥ तुःस्वप्नोनश्यतेतेषां
सुस्वप्नश्चभविष्यति ॥ २६ ॥ अनिरुद्धंगजंग्रा
हंवासुदेवंमहाकृतिं ॥ संकर्षणंमहात्मानंप्र
द्युम्नंचतथैवच ॥ २७ ॥ मत्स्यकूर्मवराहंचवा
मनंतार्क्षमेवच ॥ नारसिंहंचनागेंद्रंस्रष्टिसं
हारकारकं ॥ २८ ॥ विश्वरूपंहृषीकेशंगोविंद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मधुसूदनं ॥ त्रिदशैरर्चितंदेवंदृढभक्तिम
नामयं ॥ २९ ॥ वैकुंठंदुष्टदमनंभक्तिदंमधु
सूदनं ॥ एतान्निप्रातरुत्थायसंस्मरिष्यंति
येनराः ॥ ३० ॥ सर्वपापैःप्रमुच्यंतेपुण्यलोक
मवाप्नुयुः ॥ श्रीशुक उवाच ॥ एवमुत्क्रमहारा
जनूगजेंद्रमधुसूदनः ॥ ३१ ॥ स्पर्शयामास
हस्तेनगजंगंधर्वमेवच ॥ तौचस्पृष्टौतनः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ सद्यो माल्यांबरधरावुभौ ॥ २२ ॥ तमेव मानसं
प्राप्यजगमतुस्त्रिदशालयं ततो दिव्यवपु
र्भूत्वाहस्तिराट्परमंपदं ॥ २३ ॥ गछन्तिस्म
महाबाहोनारायणपरायणः ॥ ततोनार
यणश्रीमान् मोक्षयित्वागजोत्तमं ॥ २४ ॥
ऋषिभिः स्तुयमानाग्रेवेदगुह्यपदाक्षरैः २१
ततस्तु भगवान् विष्णुर्दुर्विज्ञेयगतिः प्रभुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५ शंखचक्रगदापद्मरंतर्द्धानंयुधिष्ठिरः
गजेंद्रमोक्षणंद्रष्ट्वा सर्वेप्रांजलयस्तदा
३६ ववंदिरेमहात्मानंप्रभुंनारायणंपरं
विस्मयोत्फुल्लनयनाः प्रजापतिपुरःसुरा
३७ यइदंशृणुयान्नित्यंप्रातरुत्थायमानवा
प्राप्नुयात्परमांसिद्धिंनरःस्वप्नंतस्यनश्यति
३८ गजेंद्रमोक्षणंपुण्यंसर्वपापप्रनाशनं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रावयेत्प्रातरुत्थायदीर्घमायुरवाप्नुयात्
३९॥ श्रुतेनहिकुरुश्रेष्ठसप्तेनकथितेनच॥ग
जेंद्रमोक्षणंचैवसद्यःपापात्प्रमुच्यते॥४०॥मया
तेकथितंराजन्पवित्रंपापनाशनं॥कीर्तयस्व
महाबाहोगजेंद्रस्यमहात्मनः॥४१॥चरितंपु
ण्यकर्माणिपुष्कलंवर्द्धतेयशः॥प्रीतिमान्पुंड २२
रीकाशोगजेंद्रःखात्प्रमुक्तवान्॥४२॥वैशंपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यनउवाच॥ एतच्छ्रुत्वा महाबाहोभारता
नांपिता महान्॥ गजेंद्रमोक्षणंराजाकुंतिपु
त्रोयुधिष्ठिरः॥४३॥भ्रातृभिःसहितःसम्यक्
ब्राह्मणैर्वेदपारगैः॥ पूजयामासदेवेशंपा
र्थंमधुसूदनं॥४४॥ विस्मयोत्फुल्लनयना
श्चत्वानागस्यमोक्षणं॥ ऋषयस्तमहाभा
गसर्वेप्रांजलयस्तदा॥४५॥ अजंवरेण्यंव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ रपद्मनाभंमहाबलंवेदनिधिंसुरोत्तमं
तंदेवगुह्यंपुरुषंपुराणंववंदिरेवेदविदां
वरिष्ठं ॥ ४६ ॥ एतत्पुण्यंमहाबाहोजनानां
पुण्यकर्मणां ॥ दुःस्वप्नदर्शीनेघोरंश्रुत्वापापा
त्प्रमुच्यते ॥ ४७ ॥ तस्मात्वंहिमहाराजनृ
पद्मारणंहरिं ॥ विमुक्तःसर्वपापेभ्योप्रा
प्स्यसेपरमंपदं ॥ ४८ ॥ यदामहाग्राहगृहीत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कातरंसपुष्मितापप्रवनेमहाद्विपं॥ विमो
क्षयामासगजंजनार्दनःस्मरामिदुःखप्र
विनाशनंहरिं॥४९॥ परंपुराणंपरमंपवि
त्रंपुराणमीशंसुरलोकनाथं॥ सुरासुरैरर्चि
तपादपद्मंसनातनंलोकगुरुंस्मरामि॥५०
परंपुराणंपरनंपवित्रंपुराणमीशं॥ वरं
गजस्मरणाद्विमुक्तिहितोःपुरुषवरस्तुनिधि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ यदेहगीतं ॥ सततमभिपठंतियेतुतेषा मा
जन्ममरणांतिकंपापंनस्यात् ॥५१॥ धर्मेदृ
ढबद्धमूलोवेदस्कंधःपुराणशाखाढ्यः ॥ क
तुकुसुमोमोक्षफलोमधुसूदनपादयोज
यति ॥५२॥ नमोब्रह्मण्यदेवायगोब्राह्मण
हिताय॒च ॥ जगद्धिताय कृष्णायगोविंदा २४
यनमोनमः ॥५३॥ आर्तोविषाणाग्निथि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लाश्रभीताघोरेषुव्याघ्रादिषुवर्तमानाः
संकीर्त्यनारायणशब्दमात्रंविमुक्तदुःखा
सुखिनोभवंति ॥५४॥ वेदरामायणेचैव
पुराणेभारतेतथा आदौमध्येतथाचांते
हरिःसर्वत्रगीयते ॥५५॥ एकोपिकृष्ण
स्यकृतःप्रणामोदशाश्वमेधावभृतेनतु
ल्यः ॥ दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीनपुनर्भवाय ॥५६॥ सर्वरत्नमयोमेरुः
सर्वाश्चर्यमयंनभः ॥ सर्वतीर्थमयीगंगा
सर्वदेवमयोहरिः ॥५७॥ आकाशात्पति
तंतोयंयथागच्छतिसागरे ॥ सर्वदेवनम
स्कारंकेशवंप्रतिगच्छति ॥५८॥ गीतास
हस्रनामस्तंचस्तवराजमनुस्मरन्तिं ॥ गजें
द्रमोक्षणंचैवपंचरत्नानि भारत ॥५९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इतिश्रीमहाभारतेशतसहस्रसंहितायांशांतिपर्वणिदानधर्मेनरेगजेंद्रमोक्षसमाप्तः॥ ॥शुभंभवतु॥ ॥श्री॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=24.07.20 14:18
,TRANSFERRED=2020/07/24 at 14:26:08
,PAGES=53
,TYPE=STD
,NAME=S0003375
,Book Name=M-2653-GAJENDRA MOKSH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection